# रम्या पुत्तलिका

कश्चित् लोलः बालकः आतुरेण स्वगृहे स्वक्रीडापुत्तलिकाम् अन्विष्यति। कुत्रापि तां न प्राप्य व्याकुलः भवति। सः क्रन्दन् स्वमातरं पृच्छति कुत्र मम पुत्तलिका इति।

जननी अपि अन्वेषयति किन्तु कुत्रापि न प्राप्नोति। ततः शिशुं क्रोडे उपावेश्य जननी कथयति - "वत्स ! मा क्रन्द, अहं तुभ्यम् अन्याम् एकां पुत्तलिकां दास्यामि।" परन्तु केवलं ताम् एव प्राप्तुम् इच्छामि इति हठं कृत्वा स पुनः क्रन्दन् शय्यायां शेते ।



अत्रान्तरे कश्चित् पौत्तलिकः मार्गे संचलन् पुत्तलिकाः विक्रीणाति - "पुत्तलिका ..... रम्या पुत्तलिका ... ।" तस्य आह्वानं श्रुत्वा माता पुत्रं वदति - "वत्स ! तत्र गत्वा पश्य तव मनोमता पुत्तलिका प्राप्यते वा न वा" इति। यदा स आगतः तदा पौत्तलिकः तं पृच्छति

- भो बाल ! त्वं कीदृशीं पुत्तलिकाम् इच्छसि ?

- अहं तां पुत्तलिकाम् अन्वेषयामि या मम प्रिया आसीत्। अत्र तु सा न दृश्यते।

- सा पुनः प्राप्यते वा न वा इति न जाने। परन्तु एवम् एकां पुत्तलिकां तुभ्यं दास्यामि यत्र सर्वाः पुत्तलिकाः सन्ति। इति उक्त्वा स्वस्यूतात् समादाय तां पुत्तलिकां तस्य कोमलहस्ते अस्थापयत्।

बालः अपि तां दृष्ट्वा विस्मितः सन्तुष्टः च जातः। पूर्वतनीं पुत्तलिकां विस्मरन् स बालः पौत्तलिकं प्रणम्य तया पुत्तलिकया सह स्वगृहं प्रत्यागतः। तस्य स्मेरं मुखं दृष्ट्वा माता बोधति यत् पुत्रः तस्य प्राप्तव्यं प्राप्तवान् इति। सा शीघ्रं बहिः आगत्य पौत्तलिकाय धनं दातुम् यावत् इच्छति तावत् पौत्तलिकः ततः निर्गतः आसीत्। अधुना कथय। कस्य सा प्रतिमा ?